बिल्वाष्टकं 2

बिल्वाष्टकं 2

त्रिदळं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधं |
त्रिजन्म पापसंहारं एकबिल्वं शिवार्पणं || 1 ||

त्रिशाखैः बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः |
तव पूजां करिष्यामि एकबिल्वं शिवार्पणं || 2 ||

कोटि कन्या महादानं तिलपर्वत कोटयः |
कांचनं शैलदानेन एकबिल्वं शिवार्पणं || 3 ||

काशीक्षेत्र निवासं च कालभैरव दर्शनं |
प्रयागे माधवं दृष्ट्वा एकबिल्वं शिवार्पणं || 4 ||

इंदुवारे व्रतं स्थित्वा निराहारो महेश्वराः |
नक्तं हौष्यामि देवेश एकबिल्वं शिवार्पणं || 5 ||

रामलिंग प्रतिष्ठा च वैवाहिक कृतं तधा |
तटाकानिच संतानं एकबिल्वं शिवार्पणं || 6 ||

अखंड बिल्वपत्रं च आयुतं शिवपूजनं |
कृतं नाम सहस्रेण एकबिल्वं शिवार्पणं || 7 ||

उमया सहदेवेश नंदि वाहनमेव च |
भस्मलेपन सर्वांगं एकबिल्वं शिवार्पणं || 8 ||

सालग्रामेषु विप्राणां तटाकं दशकूपयोः |
यज्ञकोटि सहस्रस्य एकबिल्वं शिवार्पणं || 9 ||

दंति कोटि सहस्रेषु अश्वमेध शतक्रतौ |
कोटिकन्या महादानं एकबिल्वं शिवार्पणं || 10 ||

बिल्वाणां दर्शनं पुण्यं स्पर्शनं पापानाशनं |
अघोर पापसंहारं एकबिल्वं शिवार्पणं || 11 ||

सहस्रवेद पाठेषु ब्रह्मस्तापन मुच्यते |
अनेक व्रतकोटीनां एकबिल्वं शिवार्पणं || 12 ||

अन्नदान सहस्रेषु सहस्रोपनयनं तधा |
अनेक जन्मपापानि एकबिल्वं शिवार्पणं || 13 ||

बिल्वष्टकमिदं पुण्यं यः पठेच्छिव सन्निधौ |
शिवलोकमवाप्नोति एकबिल्वं शिवार्पणं || 14 ||